# Ganeshastotram Ratnapanchakam 1

# ગણેશસ્તોત્રમ્ રત્નપઞ્ચકમ્ ૧

## Document Information

Text title : Ganeshastotram (Ratnapanchakam 1)

File name : gaNeshastotramratnapanchakam1.itx

Category : ganesha

Location : doc_ganesha

Author : Kalyanasevaka

Proofread by : Brahatha Mohan

Latest update : May 22, 2026

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 23, 2026

*sanskritdocuments.org*

Ganeshastotram Ratnapanchakam 1

# ગણેશસ્તોત્રમ્ રત્નપઞ્ચકમ્ ૧

(રત્નપઞ્ચકે પ્રથમં રત્નમ્ ।)

નત્વા યન્મુનય ઇહૈવ યાન્તિ સર્વે
નિર્વિઘ્નં પ્રથમત એવ તન્નમામિ ।
બ્રહ્માદ્યં સકલજગદ્ ગણેશરૂપં
શ્રીરામં વિમલમનન્તમેકવસ્તુ ॥ ૧॥

પ્રત્યક્ષં ત્વમસિ ગણેશ ! સર્વરૂપો
બ્રહ્મ ત્વં સકલમિદં સનામરૂપમ્ ।
કર્તા ત્વં નિખિલચરાચરસ્ય ધર્તા
હર્તા ત્વં ત્રિશિવવિરઞ્ચિવિષ્ણુરૂપઃ ॥ ૨॥

શ્રોતારં નિજમવ માં સદૈવ શિષ્યં
વક્તારં હ્યવસિ ન કાઽપિ મેઽત્ર શઙ્કા ।
સર્વાસ્ત્વં સુરનરસાધકાન્પિતેવ
દિગ્ભાગાત્સકલત એવ પાહિ નિત્યમ્ ॥ ૩॥

સચ્ચિત્ત્વં સુખઘનવાઙ્મયોઽદ્વિતીયો
વિજ્ઞાનં પરતરવસ્તુ દેવ ! સાક્ષાત્ ।
જ્ઞાનં ત્વં સકલમયો જગત્સ્વરૂપઃ
પ્રત્યક્ષં શુભતમમૂર્તિરેવ પૂર્ણઃ ॥ ૪॥

મીમાંસા દ્વિવિધા હિ ગૌતમમતં વૈશેષિકં યૌગિકં
સાઙ્ખ્યં વ્યાકરણં નિરુક્તમખિલં છન્દોઽથ શિક્ષાદિષટ્ ।
કલ્પો જ્યૌતિષનીતિધર્મવિવિધા વિદ્યાઃ કલાઃ કીર્તનં
હ્યાયુઃકાર્મુકવાસ્તુવેદવિષયાઃ શાખા ગણેશઃ સ્વયમ્ ॥ ૫॥

બ્રહ્મા વિષ્ણુશ્ચ રુદ્રઃ સુરપતિરનલો ભૂર્મુખાઃ સપ્તલોકાઃ
સૂર્યસ્ત્વં ચન્દ્રમાસ્ત્વં યમવરુણસુરા વિશ્વતશ્ચક્ષુરેકઃ ।

સર્વજ્ઞઃ સર્વશક્તિઃ સરિગમપધનિબ્રહ્મવીણાસ્વરૂપ-
સ્ત્વં નાથો હ્યાત્મવિદ્યા સકલસુરમુનિધ્યેયરૂપો ગુરુસ્ત્વમ્ ॥ ૬॥

ત્રિકાલાતીતસ્ત્વં ત્રિગુણરહિતો હ્યત્રયવપુ-
સ્ત્રિશક્તિર્મૂલં ત્વં વિયદનિલતેજોજલભુવઃ ।
મહાયોગી મૌની યમિહ સતતં ધ્યાયતિ હૃદા
સ આત્મા સર્વેષાં સકલસુરરૂપસ્ત્વમસિ વૈ ॥ ૭॥

લમ્બોદરઃ પ્રકૃતિતઃ પુરુષાત્પરોઽયં
વિઘ્નાન્તકો ગણપતિર્જગતોઽસ્ય હેતુઃ ।
આવિર્બભૂવ શિવનન્દનરૂવતોઽસૌ
સૃષ્ટ્યાદિકાલ ઇહ ભક્તજનાવનાર્થમ્ ॥ ૮॥

ૐ ગં ગણેશવરદં પ્રણમામિ નિત્યં
લમ્બોદરં ગજમુખં ધૃતપાશહસ્તમ્ ।
ભક્તાનુકમ્પિતહૃદં જગદીશ્વરં તં
ધ્યાયન્તિ ચાત્મહૃદયે મુનિયોગિનો યમ્ ॥ ૯॥

વિદ્યાકલાગુણનિધિં સકલાર્થદં સ-
ચ્ચિત્સૌખ્યકન્દમમૃતં પ્રભજામિ પૂર્ણમ્ ।
નિર્વિઘ્નકારકમમું નુ કલૌ પ્રસન્ન -
મત્યલ્પકાલભજનાત્સ્વપદપ્રદં તમ્ ॥ ૧૦॥

રક્તગન્ધરક્તપુષ્પરક્તવસ્ત્રધારક-
મેકદન્તવક્રતુણ્ડ રક્તવર્ણશાઙ્કુરમ્ ।
સૂક્ષ્મનેત્રશૂર્પકર્ણકં હિ મૂષકધ્વજં
શ્રીગણેશ ! બુદ્ધિદાયકં મુદા નમામ્યહમ્ ॥ ૧૧॥

એકદન્તાય વિદ્મહે વક્રતુણ્ડાય ધીમહિ ॥

ગણેશાય નમસ્તુભ્યં તન્નો દન્તિઃ પ્રચોદયાત્ ॥ ૧૨॥

નમસ્તે વ્રાતપતયે નમો વિઘ્નવિનાશિને ॥

નમઃ પ્રમથપતયે નમઃ શિવસુતાય તે ॥ ૧૩॥

નમસ્તે હ્યેકદન્તાય ચિચ્છ્રીવરદમૂર્તયે ॥

લમ્બોદર ગણેશાય શૂર્પકર્ણાય તે નમઃ ॥ ૧૪॥

શાન્તો દાન્તસ્તિતિક્ષુર્ગુરુપદકમલે પૂર્ણનિષ્ઠઃ સુશિષ્યઃ
પૂર્ણાત્માનં ગણેશં સકલભયહરં પૂર્ણભક્ત્યા વિજાનન્ ।
ધ્યાત્વા સ્તુત્વાઽથ નત્વા નિરતિશયસુખં તત્પ્રસાદાલ્લભેત્સઃ
પ્રારબ્ધં નૈવ તસ્ય ક્ષણિકમપિ તદા પૂર્ણકલ્યાણમૂર્તેઃ ॥ ૧૫॥

કલ્યાણ સેવકકૃતં સુગણેશભક્ત્યા
સ્તોત્રં ચિદક્ષરસતો ગણનાયકસ્ય ।
પાઠાત્તથા સુમનનાદ્ગણરાટ્સુભક્ત્યા
કલ્યાણમત્ર સલભેચ્ચિરશાન્તિસૌખ્યમ્ ॥ ૧૬॥

ઇતિ શ્રીસમર્થરામદાસ-કલ્યાણપદાન્વિત-
કલ્યાણસેવકપ્રણીત રત્નપઞ્ચકે પ્રથમં રત્નં ગણેશસ્તોત્રં સમ્પૂર્ણમ્ ।

Proofread by Brahatha Mohan

*Ganeshastotram Ratnapanchakam 1*

pdf was typeset on May 23, 2026

Please send corrections to *sanskrit@cheerful.com*